# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

---

### ०३१ मिश्रव्यवहारः - ४
### (क्रयविक्रयम्)

१५ - ०८ - २०१९

# गतकक्ष्यायाम् ...

- मूलधनवृद्धिः - ३ , वाप्यादिपूरणम्

# अस्यां कक्ष्यायाम् ...

- क्रयविक्रयम्

# क्रयविक्रये करणसूत्रम्

पण्यैः स्वमूल्यानि भजेत्स्वभागैः हत्वा तदैक्येन भजेच्च तानि ।
भागांश्च मिश्रेण धनेन हत्वा मूल्यानि पण्यानि यथाक्रमं स्युः ॥

अन्वयः - स्वमूल्यानि स्वभागैः हत्वा पण्यैः भजेत् । तदैक्येन भजेत् च तानि । भागान् च मिश्रेण धनेन हत्वा पण्यानि मूल्यानि यथाक्रमं स्युः ।

१) स्वमूल्यानि स्वभागैः हत्वा पण्यैः भजेत् $\frac{(\text{मूल्यम्}_{१} \times \text{भागः}_{१})}{\text{पण्यः}_{१}}, \frac{(\text{मूल्यम्}_{२} \times \text{भागः}_{२})}{\text{पण्यः}_{२}} \ldots$

२) तदैक्यम् (सर्वयोगः) =

$$\frac{(\text{मूल्यम्}_{१} \times \text{भागः}_{१})}{\text{पण्यः}_{१}} + \frac{(\text{मूल्यम्}_{२} \times \text{भागः}_{२})}{\text{पण्यः}_{२}} + \frac{(\text{मूल्यम्}_{३} \times \text{भागः}_{३})}{\text{पण्यः}_{३}} + \ldots \frac{(\text{मूल्यम्}_{य} \times \text{भागः}_{य})}{\text{पण्यः}_{य}}$$

३) तदैक्येन भजेत् च तानि

$$\frac{\dfrac{(\text{मूल्यम्}_{\text{क}} \; x \; \text{भागः}_{\text{क}})}{\text{पण्यः}_{\text{क}}}}{\text{सर्वयोगः}} \quad , \text{क} = \text{१, २, ३…, य}$$

४) भागान् च मिश्रेण धनेन हत्वा पण्यानि मूल्यानि यथाक्रमं स्युः

$$\frac{\left(\dfrac{(\text{मूल्यम्}_{\text{क}} \; x \; \text{भागः}_{\text{क}})}{\text{पण्यः}_{\text{क}}} \; x \; \text{मिश्रधनम्}\right)}{\text{सर्वयोगः}} \quad , \text{क} = \text{१, २, ३…, य}$$

# उद्देशकः - १

सार्धं तण्डुलमानकत्रयमहो द्रम्मेण मानाष्टकं
मुद्गानाञ्च यदि त्रयोदशमिता एता वणिक्काकिणीः ।
आदायार्पय तण्डुलांशयुगलं मुद्गैकभागान्वितम्
क्षिप्रं क्षिप्रभुजो व्रजेमहि यतः सार्थोऽग्रतो यास्यति ॥

अन्वयः - वणिक् । तण्डुलमानकत्रयं सार्धं , मुद्गानां मानाष्टकं च यदि द्रम्मेण, (तर्हि) एताः त्रयोदशमिता काकिणीः आदाय तण्डुलांशयुगलं मुद्गैकभागान्वितम् अर्पय क्षिप्रम् । क्षिप्रभुजः व्रजेमहि यतः सार्थः अग्रतः यास्यति ।

३.५ मानानि तण्डुलम् = १ द्रम्मः, ८ मानानि मुद्गम् = १ द्रम्मः

(तण्डुलम् : मुद्गम्) = २ : १

$$६४ \text{ काकिण्यः} = १ \text{ द्रम्मः}, १ \text{ काकिणी} = \frac{१}{६४} \text{ द्रम्मः}, १३ \text{ काकिण्यः} = \frac{१३}{६४} \text{ द्रम्मः}$$

# उद्देशकः - १

| वस्तु | मूल्यम् | भागः | पण्यः |
|---|---|---|---|
| तण्डुलम् | १ | २ | ३ $\frac{१}{२}$ |
| मुद्गम् | १ | १ | ८ |

# उद्देशकः - १

१) तण्डुलम् = $\frac{(१ x २)}{(\frac{७}{२})} = \frac{४}{७}$

मुद्गम् = $\frac{(१ x १)}{८} = \frac{१}{८}$

२) सर्वयोगः = $\frac{४}{७} + \frac{१}{८} = \frac{३९}{५६}$

३) ४) पृथक् मूल्यम् -

तण्डुलम् → $\frac{(\frac{४}{७} x \frac{१३}{६४})}{(\frac{३९}{५६})} = \frac{१}{६}$ द्रम्मः

मुद्गम् → $\frac{(\frac{१}{८} x \frac{१३}{६४})}{(\frac{३९}{५६})} = \frac{७}{१९२}$ द्रम्मः



# उद्देशकः - १

पृथक् परिमाणम्

$$\text{तण्डुलम्} = \frac{\left(२\,x\,\frac{१३}{६४}\right)}{\left(\frac{३९}{५६}\right)} = \frac{७}{१२}$$

$$\text{मुद्गम्} = \frac{\left(१\,x\,\frac{१३}{६४}\right)}{\left(\frac{३९}{५६}\right)} = \frac{७}{२४}$$

# उद्देशकः - २

कर्पूरस्य वरस्य निष्कयुगलेनैकं पलं प्राप्यते
वैश्यानन्दनचन्दनस्य च पलं द्रम्माष्टभागेन चेत् ।
अष्टांशेन तथागरोः पलदलं निष्केण मे देहि तान्
भागैरेककषोडशाष्टकमितैर्धूपं चिकीर्षाम्यहम् ॥

अन्वयः - वैश्यानन्दन ! वरस्य कर्पूरस्य एकं पलं निष्कयुगलेन प्राप्यते । चन्दनस्य पलं द्रम्माष्टभागेन च (प्राप्यते) चेत् । तथा अगरोः पलदलं अष्टांशेन (द्रम्मेण) । निष्केण एककशोडशाष्टकमितैः भागैः तान् मे देहि । धूपं चिकीर्षामि अहम् ।

(२ निष्कौ = ३२ द्रम्माः)

# उद्देशकः - २

| वस्तु | मूल्यम् | भागः | पण्यः |
|---|---|---|---|
| कर्पूरः | ३२ | १ | १ |
| चन्दनम् | $\frac{१}{८}$ | १६ | १ |
| अगरुः | $\frac{१}{८}$ | ८ | $\frac{१}{२}$ |

# उद्देशकः - २

१) कर्पूरः = $\frac{(\text{३२} \times \text{१})}{\text{१}} = \text{३२}$

चन्दनम् = $\frac{(\frac{\text{१}}{\text{८}} \times \text{१६})}{\text{१}} = \text{२}$

अगरुः = $\frac{(\frac{\text{१}}{\text{८}} \times \text{८})}{(\frac{\text{१}}{\text{२}})} = \text{२}$

२) सर्वयोगः = ३२ + २ + २ = ३६

३) ४) पृथक् मूल्यम् -

कर्पूरः → $\frac{(\text{३२} \times \text{१६})}{\text{३६}} = \text{१४}\frac{\text{२}}{\text{९}}$ द्रम्माः

चन्दनम् → $\frac{(\text{२} \times \text{१६})}{\text{३६}} = \frac{\text{८}}{\text{९}}$ द्रम्मः

अगरुः → $\frac{(\text{२} \times \text{१६})}{\text{३६}} = \frac{\text{८}}{\text{९}}$ द्रम्मः

# उद्देशकः - २

पृथक् परिमाणम्

कर्पूरः $= \frac{(१ x १६)}{३६} = \frac{४}{९}$ पलम्

चन्दनम् $= \frac{(१६ x १६)}{३६} = ७\frac{१}{९}$ पलानि

अगरुः $= \frac{(८ x १६)}{३६} = ३\frac{५}{९}$ पलानि

# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

### ०३१ मिश्रव्यवहारः - ४
### (क्रयविक्रयम्)

१५ - ०८ - २०१९